विशेषस्य विलसितं अन्यथा मनोरथानामप्यपथानामेवंविधानां फलानां कथमिवोपभोगः तदयमुपनेतुमिथर्मा

धर्मयोः प्रथमप्रमाणेन भवदनुज्ञातेनानुगृहीतास्म्यहयामिव विहितापरिहार्यस्माहसंदेहहतकं विहातमिति कला
वतीतस्वयमुपहितप्ररोचनस्यास्य प्रयोजनस्य विषयात्मानं सापराधमिवाभ्युपगच्छन्ती समाश्वासनोपायमप्यपश्यं
ती महर्षेदेवस्तस्याप्यन्वयव्यतिरेकयोरेकतरस्मिन्नविहितावधारणान किमप्यभाणीत् स्वयमसौ मां महीयसीमापद
मापन्नामपि महात्मानोऽस्मदीयामापदि दुरासदं विदितमप्रसादयंति यतः समरातपाम्लानिस्तयाविधयोरावयोराव
योमुखेऽम्यणेऽपवत्सोरवतिष्ठमानयोरात्मानमपिकृतावुचिताचरमपिणीयमिव गणयन्नोवनापि कारेस्वरितनमि
वप्रसंजयन्निदं जगाद वालेमेवमवहेलयात्मानं नह्येवंप्रायाः कल्याणशीलाः प्रकृतयप्रकांततयात्क्लेशभाजनं भवि
तुमर्हंति विहितोऽत्र भगवता शृत्मदेनवत्सलभावादवधिः तद्यथा तस्यैवात्तस्य भावान्मोदेमम सम्यक्फलाभः तस्मात
धिकेनेकेन जन्मनेति तद्यथागतं गम्यतामिति एतदाकर्ण्य च प्राप्तपरिसांत्वनोपायाप्तास्वयियाकृतानत्रपाया सा
मामाश्वासयामास प्रियसखि प्रमाणाभासशरणा अपि प्राणिनः प्राणेषु स्पृहां प्रतिपद्यंते तवत्वयं महर्षिः स्वयमेव
समाश्वासनमभिदधाति न चास्य भ्रमः प्रमादो विप्रलिप्सा करणापाटवं वा संभवति शरीरमेव ह्यस्य स्थूलविशेषवला
द्विपर्यस्तं न तत्प्रभावः भगवदभिहितस्य शापस्य शापांतोऽपि न सांशयिकत्वेन शंकनीय इति ततोऽहं तदभिधानस्यावि
पर्ययसंभावनानर्हतया दुस्त्यजतया चात्रवं विनप्राशापाशस्यानुभवनीयतामेतावतो दुःसहस्य क्लेशराशेरपरिसि

त. क्र
७६
76

मामनवेक्षितदेहां मकाण्ड एव दृष्टानां तन्वेति पद्मसद्य एवाभिसारार्हमशेषं वेशं भगवन्यथात्तापयसि नाकिमप्यशक्यं तप
स्विनां भवद्विधानां भवत्यसौ दोहीतरानभिज्ञातामेवमां संप्रत्येव समवनमपि प्रापयेत् अन्यदपि महिउं वनापाकरणा
न्नरूपं विदध्याद्देव किंतमंदायाममकृते तत्र जनेक ष्टं दर्शीतरमामादितवति शृहानामं तौ समभ्युपगतमर्यादाभंगमा
गापि हितीयं कृतत्र भावमात्मनि समारोपयेयम् अतो त्वैवा मतममाश्रित्य प्रदेशं वस्येन विधिना वर्तमाना निवसेयमि
ति स्थरयामि तद्दिह्वाव ग्रह मभ्युपगत्तया भगवता विधीयमानमपी स्वकामा कदापि सार्हसं कार्षीरार्धीयं प्रकृत्या न जात
विक्रियामासादयिष्ठी ति तदुपदेशरसायनं दृढदयेन ष्टताजीवितप्रियं जीवितयोः प्रातिकूल्यानुकूल्यसंपादयितारं तमे
व सादरं प्रणम्य महदेवानभ्युपगतहृगमनपत्तया कलावत्यानुगम्यमानास्य महासरसोनातिदूरमिमं महातरुमा
श्रित्य निवासधियं निबद्धवत्यस्मि ॥ अथ तथाविधमहत्त्वांतदर्शनहृत्वांतः करणावेदायां कलावत्यामिव जीवनं प्रत्यना
दरं विभावयंत्यां विभावर्यां तादृशमदीयदुर्दशोदीक्षणोनह्यमानानां वनलतानां वाष्पशबलमकरंधिवत्सु दिलेषु मंद
मारुताहतेष्ववश्यायबिंदुषु दृश्यमानेषु मत्कृते समामंजस्यदानां संजातकरुणानां काननानां कहानां क्रंदितेष्विव श
कुनिकुलकलप्रालापेष्वाकार्यमानेष्व रजनिममिव्यापृजनितप्रजागरे क्रमेणादीयमानारुचौ मदीयदेहशव चंद्रमसि
मंदतामापद्यमाने विषादनालोकितां मां विचेतुकामा समसहचरीष्विव किंचित्प्रकाशमानमृखासु दशासु दृश्यमानासु

श्रप्रयोजनतया सखीजनेन निर्दिमैर्मदर्थमुपकल्पितैः कुंकुमांगरागैर्विगमल्लिमिर्भीनवीयैर्लोहितं देहं वहंती
षुहरित्स्वप्याधारमिंदुकरोन्मले विंदुसरोजले विहितावगाहा विहायचंद्रातपच्छेदमिवडकूलं परिशुष्काहणाकवे
कदेशमिव वल्कलं तदुच्चासिग्रामात्पनिष्प्रयादेकमेव कंठवलयं परिशोषयंती सदसत्कर्मसाक्षिणं भवनचक्र
षंमुपस्थायोपक्रांतं कामपमपिकर्मत्यज्यमानं प्रसवाया यज्ञायतस्त्वमपि प्रक्रमर्यादामपादायलज्जया सखीजनद
र्शनं परिजिहीर्षुस्तदागमनसमयादारभ्य गिकाम्यागेवगताभगवतीनगेंद्रकन्यांतकालोचितेन सलिलकुसुमात्म
केनोपचारेणोपचर्य्यमंदभागेमं देशमभ्यागाम् कलावती ततदशक्यप्रतीकारमपितमर्थं प्रणायसामर्थ्यमात्रे
णसखीभ्यो विवदंती किं चिद्दिलंबदिनांतरीयतदागमनसमयसंजातीयं प्रतीक्षमाणा प्रमाणापेतमपितत्सर्वमदी
यदुर्विलसितं समागतां मंदारमंजरीमपिश्रावयांबभूव साततदाकर्णानानंतरमेषप्रयत्नमोडूयमानहृदयाप्रण
यमात्रं प्रमाणयंती शर्वपरमनाकलय्यनाहमेवंवेदनया कदर्थ्यमाना यांमदयंतिकायामात्मानं विवाहविषयको
त्साहसाहसेन परिहासयिष्यामीति दात्तायणीमिव समाचचक्षे निर्वर्तितदेवतासपर्या च कलावत्यादर्शमानमार्गा
नकालमिलितेन सखीसमूहसहितेन समसखीसमूहेन सहसमागमैकमात्रदिवसानंतरितदर्शनामपि मांदशा
विशेषवशेन बहुकालादनालोकितामिव ममममाना परिरंभादिना संभावममहारंभमाणिवाष्पवारीणि विसृजंती

न॰ कु॰ मुहूर्तमिवासित्वाग्रहं तकलावतीसकाशात्तया वियोगं तस्याः संथामवधार्य कृतनिश्चिदापततामरताप्रवाहांतेरणापसार्यमा
णोशर्वप्रवारेवमविनिः फलेनाप्युद्वेगवता हृदयेन विवलावशादात्मानं स्तंभयित्वा निरुद्धवाष्पवेगं तामभ्यथाम् सखि
११ मंदारमंजरि मंदारमंजलिवंधेन विलापयामि यदिदं विधिनैवं विडंवितायां मयि मृतजीवनाय जीवन्मारणमिवाथच
77 लगोलकभेदनमिव गंडस्योपरि विस्फोटकमिव क्षते क्षारप्रलेपमिवासंतमप्रयोजनकं प्रतिज्ञाथिरोरमहासाहसंविरि
तवत्यसि किमिदं तवोपकारः अन्नममैवापमृतीकारोपायः अथ वंधुजनवैमनस्यसंमार्जने आहो सित्पारलौकिकोप
करणं किमृतमदनवासावकूलं किंवातपस्युपयोगीति नावधारयामि तद्विरमतामस्मात्क्लेशमात्रफलकादीह
शादभिनिवेशादिति सावेतदुपश्रुत्य सममभ्यधिकैरश्रुभिरममर्थहृदयांतर्गतमात्रं प्रक्षालयंतीव सकोपमिव
सोपालंभमिव च मामवादीत् सखि मदयंतिके यदेवमभिदधासि तत्किमिदानीमेव ते विपर्यस्ता प्रकृतिः किंवा प्र
स्तवमसि प्रणयविशेषं उतनाकलसि मामभिप्राय अथ शर्वमपि प्रणयामि नयमात्रमाचरंतीमदीयहृदयं नात्ता
सीः यत्समानस्य खेदुःखवेतेव सा विभावस्य स्वरूपमिति प्रसिद्धप्रवलोकप्रवादः प्रयोजनं तव तस्तो स्तमानामभ्रवाः
किंतद्गवेषणप्रयासेन कार्यं यदिहोदयमेव पीयूषमयूखे जलनिधिः समुल्लसति द्रवतां चोपैति चंद्रकांतोपलः अ
कुलायते च कमलं नकेनानुरोधेन नकेन वा विरोधेनेति ताववदवधारय वस्तस्तभावे च प्रयोजनं पर्येषयन्जनो मरु

ताम्मपहास्यपवस्थात् स्वयं विहिताया प्रतिज्ञायाः स्वामिनिदेशमात्तद्विपरीतं प्रयोजयन्तीन्नरगाश्चैवनराग विस्म
रणमवहरसि तदतः परं शापितासि मच्छरीरस्पृष्टिकया यदि भूयोऽपि कदाचिदेवमभिदधासि इत्यभिधाय च व्यरम
त्। अहं तु मया सह देववने वस्तुकामो सशरीरक्लेशमगणयन्ती मंदारमंजरीव यस्मात्स्वर्गं च भवनादप्यभ्यधिके सालो
समाजे विपिनवासप्रतिज्ञा मम भवती मिरूपरुद्धास्यादिति कथंचिद्विसर्ज्येतत्कालागतौ पितरावपि तयैव वियया
व्यसर्जयम् ॥ अथैकदा जगदंबिकार्चनसंविधानात्वरोथादत्ववहम विच्छियमानगतागतप्रसंगया कथंचित्प्रार्थना
भिर्वयस्याभावमुपलंभितेन परिगृहीतदिव्यांगसंगावसनाभरणप्रसाधनेन तपोनिधिना कन्यास्वरूपेण मया सम
निरूप्य भेदं सारूप्यं विज्ञाणेन ह्रस्यमानेन मदीयं स्वरूपमयं कष्टमयं चावस्याद्वयं प्रगपदेनानुभवंत्या मंदारमञ्जर्या स
हासीनाया मयि यो मया शंर्वमानसकेतना सहस्रमालपन्तुष्टः स्वपवसवाड्नामा दानवेंद्रो दानवेंद्रेणाकंदरमालि
नादो रित्रस्पतादृशीं दशामुपस्थाएवतानस्मीपं प्रहितो रूपसाम्येन वेषसंवादेन च मयि तपोनिधौ च संजातविपरी
तसम्प्रदालंबनो पि वयस्यां नरागां सकाशादवधारिततत्वः समागम्य कृतप्रणामो महर्षे कंदरमालीमाता महोबा
हुस्यामपशुद्ध शिरस्या जिह्म भवदनागमनकारणेन तत्वाकस्मिकेन रूपव्यत्ययेन ह्रूयमानस्त्वां समादिशति प
वसंहते पितात्मानमसंतं वैमनस्याय समर्पयितुमर्हसि विदितास्मे भवत ह्मोतोऽसि अथ अतिल प्रवर्धमः विजि

त॰ कृ
७८
78

तापवसर्वक्लेशाः अपिचदौहित्रइतिस्नेहएवमांमावरयति भवांस्तुजगतांनिग्रहानुग्रहसमर्थःपरानपिसमाधातुं
शक्तोसि किंपुनरात्मानंमित्रमित्थायस्वयंप्रत्यभिज्ञायमानतयाचिरात्प्रवृद्धस्नेहतयाचमंदारमंजरीलाभेदास्मृतोमाम
भिज्ञायसप्रपंचमाख्यातवान् भवतितदानींमानसकेतोः सकाशादाकर्णितएवमवगाममहाश्चैंद्रः कंदर्पमालीतदा
मज्जन्माचसमरमस्वेष्वहावधिकाभ्यधिकभावाभाववक्रतराउद्धजो विजयध्वजोनाम तत्रकंदर्पमालीपुरंदरप्रभवो
वृंदारकास्त्रिर्जितवद्धतंसमयंप्रभृतिसकलविषयोपभोगतयाश्रुद्धतयाचमनोनांसंगत्याचधर्मासम्माचसप्रह्लादरव
विहायाधर्मप्रसंगंपरिजिहारत्रिदशाभिभवविषयकममभिनिवेशविशेषं विजयध्वजस्तुकंदर्पमालिनंदनोगत्वामंदरा
चलममंदसमांदोलितदुग्धोदन्वदुत्कलिकाकलापपरिशीलितामृतमांतदीयमेवेलामवलंब्यमयदानवइवत्रि
नयनंपरितोषयितुकामोबहुनराणिदिव्यानिहायनसहस्राणितपस्तेनेवातिवाहयांबभूव तथाहि प्रखरपवनप्र
कीर्यमाणतप्तसिकताशकलपुनरुक्तिनशाणिकिरणास्वतप्ताणिवर्षेषुनिदाघदिवसेषुवनरणिज्वलतांजातवेद
सामंतरालवर्तीकमलवन्मार्तंडमंडलमात्रनिबद्धदृष्टिरभवत् तिरोहितहरिदंतरितांतरेषुवर्षत्स्वबलाहककु
लेषुविरामरहिताभिरतिप्रमाणाभिर्धाराभिरभिहन्यमानोकदंबतरुरिवानाहतोपिनविकारमभजत् अनवर
तनीहारनिवहवध्यमानतुर्दिनासुहैमतीषुरजनीषुश्वश्वप्रतिध्वानकश्वजलोदरंनव्यभिचचार कदाचिछुकुं

तरुफलमयमाहारमकल्पयत् कदाचित्पवन इव हृदादवशीर्णानि पर्णानि निशांतर्गतान्यानतानजातनिद्रै
सारिण इव सलिलमेवास्वादयामास कदाचिदाशीविष इव पवनमात्रेणापि चिरमाशयांचकार जातचिच्छिलाग्र
चक इवैकांगुष्ठमात्रेणावतिष्ठमानोऽवयवावच्छिन्नसर्वांगीणावामंदमपि स्पंदनविभरो बभूव पर्वतपस्यति तस्मि
न्विश्वामित्र इव ब्राह्मणजातीयं तेजोमयं देहांतरमापन्नेनेतो निर्जग्मुर्जगति संतापर्यंताः समंताद्विहायस्तलमवलि
हाना महाब्रवाहादहनेरतयः तस्य भावाविहिताभिभव इव धूमायमानेन च दिग्भुवैः सममंतरिक्षतलेन इव ववदही
ष्यंतनिदाघदीधितिः तन्नयोभीतानां दिक्पालानां संतापोऽस्मानिश्वाससंततानामिव मुहूर्तमपि न पर्यमंत प्रचंडः करी
षंकषामरुतः तद्घोरवाक्रांतेवाम्लानं धारयितुमपारयंती भूतधात्री महीधरैः सहानवरतमाचकंपे तद्भयावेशा
न्मार्गमसरंत इव ग्रहगणाः प्रतिकूलां गतिमाकलयांचक्रुः अस्यानमिद्धं नाम हैंद्राज्यतत्स्थानात्प्रचलितादिव म
याहेपमानस्य पाकशासनस्यापरस्परमभिहन्यमानानां करवलयानां कलकलः समुदलसत् तद्विजयलक्ष्मी
कुसुमांजलय इव निपेतुरकस्मादेवोच्चैःश्रवसो विलोचनाम्भोजलविमध्यवासमसमयांतर्गतमुक्ताफलानुकारि
णो बाष्पोदबिंदवः कृताभ्यंतरप्रवेशेन बद्धलांगलाभोपेतेन तद्धलेन प्रतीपमाकृष्यमाणाः कलिंदनंदिनीकल्लो
ला इव नबाध्याभिमुखं प्रसस्नुरैरावतकुंभस्थलदानवीचयः हलसमाकर्षणासंभावनयाभीता इव गीर्वाणमणि

त·क·
७९
79

कोणगणाकेशपाशां स्तनजद्धोंघविस्तरवक्कंपमानकराभिः सखीभिरुह्यमानाः समंततः तद्दयातिशयादाश्चर्यमापयोः
सूर्याचंद्रमसोरंतर्मोहात्मकमिव वहिरण्यवर्वर्णपेवराद्रूपंतमोनघ्यरमत तत्प्रभावोद्भाविताभिभवतयाद्वीयोविहा
रेविमलीभवंत्यश्चवविश्वत्रययोदीपितयोतिसंधानयावनविधानात्परिधिंसंदधिरेतमाधमानिरेकाहितहेतियरण
शक्तिवैकल्यादिवविश्वतमसामिथेनीविभिरधर्षभिः समिद्धमानाग्रपिनतत्ववरोर्जांतवैतानिकानानवेदसः तस्याक्र
मचिंतयादिवानिशं विश्वरूपेतो विवस्वदादीनां तेजसामवयवाइवसमालसंतपतयालवोमहोल्कासमूहाः तदीयवि
क्रमादभिम्लोभवितमप्रतिमादेवताभिरथ्यास्यमानाग्रपिप्रतीपमवरत्नमहावाहिन्यः तद्दलादाक्रम्यमीनेविभज्यमा
नावयवकंदराछलेनमंदराचलेहर्षोत्कर्षांडल्लसंतइवसमास्फालितकल्लोलजालतालाश्चंभोनिधयोमर्यादमल्पयन्
प्रवमाकुलीभवत्सुभवनेषु भगवान्भवानीवल्लभोभिममाभिमित्तयास्यनिभालनीयतांवभाज सततप्रथमंप्रकरावर्त
कोद्दरेविद्यमानानांविद्युतांनिषद्यामिवयोगपट्टेनविद्योतमानानाम् ब्रह्मांडमंडलेषु निर्मथ्यमानकृतिसंघुत्तणानां
लक्ष्मिवाम्बुघणांनां कल्पांतकालीनानांपरःसहस्राणांसमाहारमिवमिहिरसमूहानांग्रनधिगतसार्थभावानां
माईमिंद्रपराईमिवसप्तधादीधितीनांपरपत्रपरतद्दर्शनशक्तिरासीत ॥ क्रमेणचसात्विकसंनिवेशस्तंगंमहार्णव
गुणचरणं महिकाकारविकारनयनमहीनंमहागिरिशायं बहुप्रकारासितंमूर्त्तमिवधर्मेशारदश्चमिवांतरदश्च

भूतरसंडुग्धोदन्वंतमिवप्रवालपीठितं हिमवंतमिवप्रकाशितभवानीकं कैलासमिवदृग्वदनदीयमानोल्लास
मूलोकमिवसमासन्नसिंधुराजितं धूर्जटिजटाजूटमवलितशशाभिघातोच्छलज्जाह्नवीजलप्रवाहेणेवचांद्रमस
मरीचिनिचयरुचिरेण गगनगमनवेगोद्भूतेनप्रसारितावयवेनबालहस्तेनचामरेणेववीजयंतं पदवीस
मर्दमिलितैस्त्रिशिखिंजैर्वलाहकशकलैर्मधूमैस्त्रिपुरानलस्फुलिंगैरिवचरणालग्नैर्विराजमानेहरनिर्मा
लमंदारकुसुमसमूहमुद्वमंतमिवफेनव्याजेनविशदयंतं विषाणविघट्टनोल्लिखितेनामृतमेनकैलाससमा
द्वेनेवककुदेनविद्योतमानम् भवभक्त्यासंवलितकंबलेनेवगलेनविलसंतं श्वेतेनगगनतोरणेनेवशृंगांतरेण
प्रकाशमानम् भुजगराजनिश्वाससमीरणाहितप्रेरणादनिशंखणखणायमानकिंकिणीकोलाहलकैतवेनउ
ःस्वराणांस्वराणामभ्यासमिवकुर्वाणम् उदंचंतीभिश्चरणमशबलेलोर्मिभिर्हंसप्रकीर्णकमालामिवप्र
संजयंतं अनंतानांब्रह्मांडानामारंभसमयपातानिवबितन्वंतंप्रतिमुहूर्तमभिनवानांतुषारकिरणानांकौमुदीको
षमिवप्रकटयंतं बहूनांब्रह्मांडानांनालिकमलानांमृणालजालानीवोद्वमंतं कल्पांतकेलिकलापलग्नपुष्कराव
र्तकशकलायमानेपर्याणीकृतकुंजराजिनपल्लवेनपुरीभवदाशीविषमालेविषदायमानविषदहनहेति
निवहैरनवरतंशंपासंपातमिवसंपादयंतं अपरिच्छिन्नपृष्ठधवलतयादृश्यमानमंदाकिनीप्रवाहेणकिरातक

तं·क

८·

४०

लेखराकलनकालकवलितानंतयात्यंतंजयेष्वपिसंबंधिनो बाणगणानिवोद्गिरंतं दत्ताधरप्रमथनावसरप्रसक्त
पुष्पदंतशाकलैरिवकपालैःकलितावतंसं सर्वांगीणैर्भुजंगराजफणामणिभिरुरुणावैरैरिवप्रादुर्भावकाल
लेखैरंधकासुररुधिरच्छटैरेवविरोचमानं कल्पांतकालानलज्वालाभिरिवावलग्नाभिर्भाललोचनसमुद्गताभिरि
वावेष्टिताभिः शिखाभिरतिप्रसारप्रतिबंधेष्विवोपरिष्टात्कृतसंरवाहिनीमयावरणाभिर्जटाभिर्विराजमानम्
मंदाकिनीप्रवाहविहारिणीमिवराजहंसीं पुंडरीकांतसमर्पितसलोचनमयनीलोत्पलीयामिवमृणालीं अखंड
ब्रह्मांडमंडलानामवयवोद्घाटिनीमिवकुंचिकां बालरूपगृहीतानंतवलनमयवक्रतरविलेखनार्हामिवघटि
कां भावरेखेशावतंसीकृतामिवकेतकशिखां चंद्रलेखां दधानं भुवनदाहभीत्यासंनिरुद्धप्रसरसभालतलवि
लोचनस्यावयवांतरेभ्यो निर्गच्छतीभिर्ज्वालाभिरिवाभरणभुजंगोद्गीर्यमाणगरलहव्यवाहहेतिसंहतिभिरालिप्य
मानदेहं नयनानलाहुतिभूतस्मरसमथनतोदग्धभस्मामथसारसतितापवीरुद्धमिवभूलतांविशाणां प्रविरत
समुल्लसद्भिर्नयनमयपुष्पवन्मयूखैर्निमेषोन्मेषसंदृताविर्भाविताजगतां संध्यामिवगणयंतं त्रिपुरवधाव
सरकृतिपरिसरप्रसारिबाणावाजरूपिसमीरणसमासादनसमासादितदीर्घतरसंस्कारतयेवदक्षिणकर्णा
लंकरणेनलोचनमयचंद्रचंद्रिकासुधावलेहलोलुपतयेववामश्रवणाभरणेनफणिनांतरलीक्रियमाण

सत्तमात्रचरनामसाम्यप्रणयादिव मिहिरेण मदनभस्मराजो रूषिततनयेव तत्क्षदृदास्तथा करेणकौरेकमयतः स्वप
मानना मादंडं कल्पांतक्रूपीटयो निपानप्रमत्तावेभ्य यस्तयामावमभितः प्रसृताभिर्बर्हिरेवावलग्नाभिर्ज्वालाभिरिव
श्रवणाभरणाशीविषगरलानलज्वालाभिरलंकृतकपोलतलम् वदनाद्बहिरेवावलंबिनीभिर्ग्रस्यमानदानवाचा
र्यचलिभिरिव शरभावतारकवलितनरसिंहसटाभिरिव कोमदीवदवदाताभिर्दशनदीधितिभिर्धौतमानं प्रकूहूत
प्रहितकंटकतटावष्टद्दनस्फुटितशातकोटिकणिकाभिरिव मणिभिरगणिताभिस्फुरता फणिनायकेन विहितहारम्
रागवशादविरतं गृहीतकंठयेव कालिकया मेचकीकृतकण्ठम् कैलासतटैनेवोपरिष्टाल्लग्नवलाहकलेखेन श्या
मद्रूपकंचयोर्वर्तिना महापरिणाहेन वत्तसालत्तमाणं धारव्यद्रुमगुडफाल्गुननिदिमतमालवल्लीभिर्वलग्नोरो
मराजीमद्देरेणावहंतं वलयीकृतभुजंगराजैर्भेग्राशावारणकैः कामथेत्रमस्तैरिव महापीनैराकृष्यमाणमंद
राचलकल्लोलिनीप्रवाहैरिव प्रमाथनरत्नमरीचिजालैरुल्लसद्भिः शिलीमुखपुंखविहृतिवेवस्तकरच्युतदंडायमा
नैः कुंडलिभिर्मध्यमाने आकृष्यमाणवाणभूतप्रगुणकृष्णपवनमालाक्रममपरागेणेवहरिवदनसितनभसिते
नथवलायमानैरखंडतांडवाडंबरोत्क्षेपहृष्णीन चंद्रकाकलायमानकररुहालंकृतैर्बाहुभिरुपशोभमानं मूर्ध्ने
र्तिमद्भिरुपहितांजलिबंधैरविरतोद्गीर्यमाणज्वलनजटालैर्ब्रह्माधिदैवतैरुपस्थीयमानम् यावद्विषयकप्रमि

त॰ कु॰
८९
81

स्वाश्रममपि विषमदर्शनं निस्पाकं तापयत्नमपि फलोपभोगोदासीनं क्षितात्मानमप्यवहंभृतिमयमप्यनहंकारं निरा
वरणमपि हर्यक्षाजिनतिरोहितदेहं उद्दमहीनमपि धृतमंदाकिनीप्रवाह शुद्धात्मानमप्यनिर्वचनीयं विश्वरूपेणावे
ष्टं देहिरण्यगर्भेण बृहदारण्यकं विश्वराजेन वैराजं बाष्कलेयेन कालेयं पुरुहूतेन पुरुषसूक्तं दक्षद्वयेन नामसाहस्र
मश्विनाश्विनाचिकेतं भृगुणा निर्गुणाम्नायभागं वशिष्टेन ज्येष्ठसाम अंगिरसा समंगलं भारद्वाजेन भार्कंडं याज्ञवल्के
न यज्ञायज्ञीयं वरतंतुना वारवंतीयं वामदेव्येन वामदेव्यं बृहस्पतिना बृहत्सामं विश्वामित्रेण रथंतरं दुर्वाससा नासदा
सीयं गौतमेन गायत्रं अगस्त्येन सत्रायणानि पर्वतेनाथर्वमूर्द्धानम् शरमदेन तरत्समंदी बोधायनेन रोथसं परा
शरेणापराजितां शार्कराक्षेण शाक्करं देवलेन देवव्रतं मार्कंडेयेन मुंडकोपनिषदं बादरायणेन रौद्रोपनिषदं मथु
छंदसा छांदोग्यं जपता स्तूयमानमनिर्देश्यमपरिमेयमनौपम्यमुमापतिमपश्यत् वितीर्णवरानुज्ञस्य प्रणम्य विज
यध्वजो मनुष्यजातीयाद्रूपाभावमसमक्षमतियोगिकं मन्यमानोऽस्मात्सर्वस्मादमरभावेन गरीयस्तत्सहायतिरेके
णास्यैरशक्यप्रवेशनिष्क्रामं तृणीकृतेन दुर्गमश्रेणीत अथानुमानामनीषितमपेतवतिच दत्तघोरविषयभावं वि
षमविलोचने समागत्य रसातलं नम्रश्रुतकंदरमालिनस्सरणीतेनाभ्यवत्तातःस्थलमवात्सीत् तस्य च त्रिपुरमिव
मयनारकाद् विद्युन्मालिनो वज्रपुरमिव वज्रनाभस्य सौभमिव शाल्वस्य प्राग्ज्योतिषमिव नरकासुरस्य कालस्य

णीमयं ब्रह्मांडांतरमिव सखेगम्यमार्गो यो जगत्त्रिविस्मागरे नागमंदिरे नाम जागर्ति यत्र कालविशेषानवच्छिन्नप्रकाश
निरस्ततमसः पद्मरागमणयः एवमश्लोकरदंतराः संख्यातीताः कमलबंधवः गंभीरांभोभृतः परिखाप्लवानासादि
तमहावराहादिविलोभोपसर्गाः कमलबंधवपयोनिधयः खचितनीलोत्पलरुचिमेडुराणि कांचनमयमंदिराणि
वश्मजटिलाः कपीटयोनयः मरकतमयमहासद्मशवसमदायप्रवविहायस्तलं तडुंफितानि कदंबकोरकस्थ
लानि मुक्ताफलान्येव तारकाणि तदुपनिबद्धानि स्फाटिकपुंडरीकाण्येव नितंबमखेडनाभोजिमृगांकमंडलानि
श्रपिच यत्र वलकेतकमिवोमाधवानवेक्ष्यमाणमखं शशविषाणमिव हृद्भवस्रोप्यविषयः भीष्मगुह्यमिव स्पृष्टतः
कृतयत्नं जयानुभावं दुर्योधनमेरुमिव धर्मराजानवाप्यप्रवेशं विध्वंदतिनामिव निषिद्धकवादसंसर्गम् पर्वास्यदिव
समिव निषिद्धमरिनाघांतर्भावं अभेद्यकवचमिवाशुगानवाप्यप्रवेशं विभाति यत्र चेंद्रचापदर्शनं दानवसुंदरीणां
स्तनाभोगेषु समनःप्रहारानुभवो वनविहारेषु दानवनाशनं गजेंद्रगंडस्थगितिभंगवर्गे वज्रसंबंधो भूषणेषु शिलिस
मरतामस्त्रारामेषु यमनामोदर्यभावो नीलमणिकुट्टिमेषु सदाशराभियोगः कार्मुकेषु वारुणीभीतिर्मानमपरिजि
हीर्षतीषु मानिनीषु श्राशुगाविर्भावस्तालवृंतावालनेषु पेलविलसद्भावो दानवकुमारेषु दृश्यते तस्मिन्नेवंविधप्रभा
वे विजयध्वजे समरमखेषु पश्चाद्रमो मत्रणयर्मोपयोगपोगदाभियातो न प्रबभूव विशृंखलवलोल्लासिनि गंभीरवेदि

त·कु· नीवसमीरणाप्रवृत्तमेकशोमकिंचिकरतामंचतिस्मदानवप्रथममस्तेविपरीतवर्णाः शापाश्ववाकृष्णाः पाशानिव
काशावभग्नः विजयश्रीमयेवनिर्भर्त्सितोरितोनिस्त्रिंशप्रहारोनवेदनामपजहार व्यायस्तौचवैवप्रतप्रणीतोदंडोनो
८२ पनिपतितंशशाक जिह्मोचविभ्रमानदयशक्तिर्नकदाप्यवकाशमाससाद जंभारिप्रहितस्संभोलेरवयवाअपि
82 शतकोटिभावमलभंत अपरिछेद्यप्रभावोत्रायमाणाशापश्ववतस्सदेहस्तिर्यग्जातीयध्वजनिरूप्यसंगरप्रसंगेभास्वत्
वरप्रांगणमगमायल्ला तस्मांदेवीमंदारमंजरीमुद्दिश्यमानेंद्रतमद्यप्रतिज्ञाय यदाभवन्मामानमकेतस्तस्मिन्निकुं
जेयलोकितदानीमेवरिंगत्तरागमांवनविहाराविभ्रांमधुसमयापिदेवतामिवविद्याधरराजदुहितरमेनामदीसम
हाद्रुतशक्तिमितेनमयागतानागनगरमनागमागणमागरेणोदेलतासरसीकृतलोकादेवीयंमद्वैरिविजयध्वजाय
तदाप्रभृत्येवजायमानेनक्रमसमायककविकारेणसनितांतमायास्यते तथाहि अवलोकितस्सदर्शनोभिन्नदर्शने
नैतदीयरूपेणवशीक्रियते तिरस्कृतिशतकोटिपिकामेनोबद्धमन्यते तृणीकृतदेवतांतरोपिकामदेवनिदेश
वातिक्रामति प्रवेशमलभमानस्सप्रथापसीपितेविलूयसमानीतामश्चखिडाश्ववतदेहविसक्ताम्मृणालदंडाश्वंडां
शुमणतिशयानेनमनसिजज्वरेणाग्लायंति तदीयोद्दाममदनदहनदाहदलनवैदग्ध्याग्रदयसमासादितमंदा
ताणीवनलिनीदलानिम्लायंतिनिमीलंतिकंदर्पदहनदह्यमाननतदवयवभस्तिसमदायाश्ववकर्परपांशवः

प्रेत्यंते जलयंत्रगृहे स्थितस्ततो लब्धतत्प्रभावनावेमवादवेदस्मामाणामेनोपरि विस्समाणस्य सेवार्यं स्वयमेवोद्यतेवारि
प्रवाहमिवोद्गच्छति बाहुयुगले विचित्रयन्त्रितिरमणीकामुकनिर्मितप्रेरणया तन्मर्मज्ञायामलेकर्माणमपि विप्र
लंवोपतापोपशमाय परिजनोपनीतं शुभ्रजातं तत्कलेवरालिंगनं नल्पकालमेव ज्ञायति तस्य च गंधगजस्येवोप
मर्दितपद्मिनीवनस्य वपुरावतस्वावगाणितहरिचंदनमालः निदाघदिनमणिरिव निःशेषशोषितजीवनः वाडवस्
वजलाभिषेकवर्द्धनीयो विरहतापः प्रसरति तदलंकालातिपातेन देवीयं मंदारमंजरी विद्रुपवाणविषाणमश
लोहे विशालनितम्बालालंकृतकुलिशकर्कशभावेमरमथनरथांगनेमिनिशितनिशितभावाद्भाविति विजयध्वजस्य
वातमिव जगद्विजयलक्ष्मीरिव निरपायां स्थितिं विभ्रांतं सफलयतु च तेन महानुपरताभिलाषं यो वनस्थलामनुभ
वंती स्वकीयं गुणगणमितमभिधाय वाचंयमं स्मीत् ॥ एतदाकर्ण्य चावनतवदनविधुविंबावायोगृहीतकरुहहकि
रणवशलाकया करांगुल्या तद्वचनमप्यास्यानले वोर्भमवभविलिखंत्यामप्रतिपत्तिमग्रयायां प्रसह्यापहरणमा
ध्मस विधूयमानायां मंदारमंजर्यां वैलक्ष्यातिशयं वहति सहचरी समहेतमहे प्रस्तवो चम् ॥ भद्र त्वमेतदेव रमणी
येजनेमहृदयानां हृदयाभिनिवेशः स्वत एवानुरागयोग्ये च जने प्रार्थनानंतरमपि नानुरागः संभवेदिति पिरस्मि
कजनेन नद्वसः पंथाः कस्य वा न विदितो निजगतीकृतत्रिजगतीरत्नसमुदायो दानववंशः तत्राप्यशेषत्रिदश

त॰कु॰ शिरोवतंसमसंभ्रमहिङ्गोतनिदेशो विजयध्वजः किं क्रियतां यदेवं भूतामवस्थामासादितवत्यां मयि मंदभागधेयायां मां या
८३ द्वारमभ्यागच्छेहाभिमानाद्वा भाविनोऽर्थस्य गौरवाद्वा प्रतिज्ञातमनया यदेवं विधायां मद्यंतिकायां नाहमात्मानं परिण
83 येनयोजयेयमिति नैतद्विपर्ययः सहचरीसमन्हेतगोचरीक्रियते नमदीयव्यापारैरपि पार्यते नजनयित्रापि संजन
यितुं शक्यते तदर्थं प्रार्थ्यमाना च प्रभूततमैः प्रकारैः प्राणावसानं प्रत्येव व्यवसायमाबबंध भूयसो वा रागान् यद्यतिरे
कप्रयुक्तास्यास्याग्रयं परिणायव्यतिरेकः स एव तावन्ममाभिमतवरसंप्रयोगो गगनकुसुमकल्पतामाक्रामति प्रागेव
तमंदारमंजर्याः पाणिग्रहणं चर्यामदीयप्रियसहचर्याः तडमरमपि जनको देवं च प्रमाणमिति ॥ अथ प्रार्थनप्र
त्यादेशविप्रलंभेगतवति तस्मिन्नवाहै ताहशं च तस्यां विजयध्वजस्याभिनिवेशमाकर्ण्य प्रतिपदमपहारसंभावन
या ततो गंतुमपारयंत्यां तस्यां विषादमलिनायमानमुखरागा समर्वा सखण्यस्या हमसकन्याद्रूपोमहामुनिस्तपोनिधि
रभ्यधात् यद्येवमस्मात्मायाविनो महासुराद्भवत्यो विभ्यति तदास्मिन्नेवाश्रमपदे प्रियसखी मंदारमंजरी निवसतु
सुखं यदावलमानसकेतनाहं बलाद्धरमाणाश्चाकर्णितमस्तदा भगवता शुभनदेनाभ्यधायि यः कश्चिदस्मिन्नाश्र
ममंडले योजनत्रयावच्छिन्नपर्यंते बलादकामां स्त्रियमभिभवति स उत्तितस्य मूर्द्धा दृष्टमतितपरिणततालफल
वच्छतशकलभावमाकलयति इति विदितश्चायं त्रिजगत्स्वशापः तदत्र निवसंत्यास्यास्याः प्रसभमपहारशंका सर्व

ध्यैव निरवकाशीकृतास्मादिति तच्च तदीयमभिधानं निधानमिवाकस्मादधिगतमस्माकमरोचततमाम् अथ का
स्मिन्सहचरीः प्रस्थाप्य विधायैदं समं चंद्रलेखाः सकाशं संदिश्य चंदनवेंद्रस्तागमनादारभ्य तत्पोषणवचनपर्यंत
मर्थं तदत्र मतिं प्रतीत्यमाणावयं यावदतिष्ठाम तावदेव तद्दूतां तत्र वर्णानंतरं स्वकृतविलोवो देवसंगचंद्रकेतरंतं द
दूतिकया देव्या चंद्रलेखया सह समागम्य मन्मपस्योपरोधमयादितो नातिदूरे संविधाय स्रडिमंतिमंदिराणि मंदा
मंजरी सहचरीनिवहसमेतां स्वभवनादस्मत्परिचितं तत्रावस्थाप्य तद्वियोगदूयमानेन मानसेन गृहानगमत् मंदा
मंजरीव प्रणयवशात्स्वयमतोऽपि मया सहैव वनवासमतिमात्रमेव स्पृहयंती एवं भूतनोदंतेन संपन्नपरितोषवि
शेषा कृतविद्वेषा व्यापारांतरेषु सा न हृतिं विधाय कुसुमदंबोधवशेवर प्रणयिनी चरणमात्रप्रवणामवशिष्टसमये
मया सह विनोदयंती हृदयमिह संयतमानसाऽवात्सीत् एवं च संसारास्वादरमनभ्यासान्नगामस्माकमयः न चाद्यापि म
नोरथः फलाभिमुखो लक्ष्यते न चामी क्लेशास्त्रभवमात्रफलकाः प्रयोजकाश्चात्मिकामाकलना विजहति देहं
साहं महाभाग एवंप्रायभागधेया किं नामात्मनो हृदयनिर्विशेषभूतस्य सखीजनस्यापि अनर्थपातहेतुरिमम
थायमदयंतिकाख्यं सीत् ॥ विप्रमात्रस्तत्तदीयां कथामाकर्ण्य संजातविस्मयो बद्धांजलिरवादीत् भगवति
वद्दाश्चर्यमय दूरीकृतसर्वथा मधुरभावाभवत्सैव ह्यावार्ता यदवधारणेन स्वात्मानमप्यहं शरण्यं तं गणयामि प

नकु
८४
84

लितंचमेप्राग्भवीयेनसुकृतविशेषेणयदिमांदिव्यांभूमिमासाद्यभगवत्याअपिसालोकारोऽत्रसेवोऽनुभूतः अथविचि
त्रासंसारस्यस्थनयः ततविहिरण्यपरिच्छेद्याःकर्मणोविपाकाः विषयव्याहतिभूद्भिरपिदुरतिक्रमाःकुसुमसायक
समुल्लासाः नचस्वमेपिसंभाव्यमिथ्याभावानिदिव्यदृशांतपस्विनामेतादृशानामभिधानानि तदपर्याप्तकौतुकम
पिहृदयंबलादेवगृहजनोपसर्पणायमांत्वरयति अनेनतरंभगवत्स्वेवप्रमाणमिति अभिधायगतस्सीमस्मृत् अथ
जिगमिषतिकुमारेमंदारमंजर्यास्तद्दर्शनावासिवांछयासर्वकथाप्रसंगेनविलंबस्यहृततयातद्रूपरोधजिह्मस
याचदृश्याभवन्मानसाधो मदयंतिकायांमस्सर्वंवस्तद्दर्शनशोभितिमिंदंमंदप्रस्यंदमतिविभ्रमानेरादिगदक्षिणे
तत्क्षणेनकाचिदागायसत्वरगमनश्रमप्रवर्तमाननिश्वासोत्कंपितपयोधरभाराकुसुमाभरणभूषितगात्राके
शपाशानवकाशीकृतमाकामनीयकेसेवितकामसिवचामरस्कंधसीमस्यवलंबमानेदयानाहृतादेवविभ्रमा
नुदर्शनोत्फुल्ललोचनेवपद्मिनीतलाकोदिकृजितकैतवेनस्वकंठयशाद्भिमिवाभ्यसंती सखीभर्तृदारिके मद
यंतिकेरयंविदितेहैमवतीचरणपरिचर्याभर्तृदारिकामंदारमंजरीभवद्देवतार्थमपायातीत्यभिधायकुमार
मवेदमदृष्टिरतिष्ठत् ततोमदयंतिकातदानीमेवतदागमनमवथार्थसिद्धमनोरथमात्मानंमन्यमानाकु
मारपरोपकारसारावलमदात्मनोसहनयदस्माभिधायदस्मभिदथानाप्यूषतयाऽभिदधामियथारमिवदेवा

३२

दनतिक्रांतावसरा प्रियसखी मंदारमंजर्यपि निसर्गसिद्धं भवत्सौंदर्यमदीयनयनेंद्रियसर्गफलानुवंधि निमार
थात अवधारयत च महाभागतामहार्यां सर्वसहायाः आकलयत च महीयमानां महीतलनिवासिलोचना
नोविज्ञानात च प्रजापतेरज्ञातपूर्वं कौशलं गणात च गुणगणमाहात्म्यसमाहारं उपनयत च विनययोव
नयोरपर्यायोपर्यायितां संमन्यतां च जनमनस्तृषमनमस्तृषष्टर्वं ग्रनुमवतां च जनकमविलजनकमनीयमहि
मानं समर्थयतां च समर्थभावमात्मनश्च वितानां विदां करोतु वासिन्नहनीयं गृहनीयमपि निवासं महनीयप
रिणामं ग्रनुसंधानविषयीकरोतु च मामवं ध्यायमानसख्यानुवंधामित्र दीर्घमस्मितं विरराम [illegible]
स्त्वमानुनयं रत्नमानुनिवासमसौ खेदानुभवगोचरं तद्दर्शनेन विधित्समानः स्वकीयस्य हासं वादिनीतदीया
मानां स्वतोप्यनतिक्रमणीयां नितरामनुरुध्यमानो भगवति यथात्वा पयसीमाभिधाय सर्वं वदेवतस्थौ ॥
अथ [illegible] मल्लिकाद्दृदयं सत्वरं तदागमनकामकंदथानायावमस्यां दिशि तरलायमाननारकं चक्षुः प्रतिपतिता
वदेव प्रचलितकलहंसकुलकोलाहलमिव चरणाभिघातेन कणाकणायमानानां नूपुराणां झंकारमसृणोत
अथ काश्चित्स्वेदजलविंदुचितगात्र्यः सिंधुवारवीरुधश्च संचारिण्यः काश्चित्करस्थितशुकशावकाधवलची
नसिचयापिहिताः सरस्वतीमनुकुर्वाणाः काश्चिन्माणिभूषणांशुविच्छुरितदेहाग्रनुतकरण्याखाइजकोकि

न.कु.
८५
85

लामंजरीरजःपिंजरिताइवसहकारवल्लर्यः काश्चित्करगतदर्पणोदरप्रतिबिंबितसकलतद्वनप्रदेशसंनिवेशाः
कौतुकातिशयाल्लिखिततच्चित्रपटपाणय इव प्रेक्षमाणाः काश्चनालंकरणमौक्तिकमरीचिमिश्रितामदनभ
स्मद्ध्विनिगात्रीरतिमिवविडंबयंत्यः अपराः स्कंधावलंबमानधवलवालव्यजनायवातांतरप्रविष्टचांद्रदीपि
तिमंडमंडिताइवमन्मथनिवासवलभ्यः इतराः कांचनमयतांबूलमरालपाणयोः तिप्रणयोदिव्यनिर्हिमनलह्
तहंसावतंसितकरामिवद्वमयंतीस्पर्द्धमानाः काश्चित्केतकीदलपाणयो निर्मलेंदुकलामयदंतपत्रकराइव
कुसुमसायकांतःपुरप्रतिहारपालिकाः काश्चिन्माणिक्यमयमृणालजंगमाइवमदनोद्यानाशोकलतिकाः
इतराः कर्णोत्पलशिरीषकोपाः शैवालशबलिताइवमदनविहारसरस्यः अन्यादंतपत्रभासमानमालाः परिण
तचंद्राइवशरद्रजन्यः काश्चित्किसलयपल्लवविभूषितवदनाः साक्षाज्ज्यामिषेककलशाइवमदनस्य इतरामरु
डुद्धृतारुणनखचेलांचलाः पताकाइवतारुण्यस्य अपरानीलोत्पलमुकुलप्रसाधितपाणयोंतःपुरप्रचारानुरूपाः प्र
रहरणोपादायिन्यइवपंचशरस्य अपराः कुलबाललीलाइवकुब्जानुगताः कतिपयादशावतारवार्ताइव
वामनानुयाताः काश्चिच्चंदनलताइवकंचुकिभिरनुगताः काश्चित्किरातजन्मवइवहिमवालुकाभिर्मिश्रिताः
काश्चिद्दिव्यमेखलाइवमणिखेदर्शितसोमोद्भवाः इतरागांधारीप्रतिमूर्त्तयइवनेत्रसंज्ञावेषपरिच्छिन्नरूपविशे

घाः काश्चिज्जलधिवेला इव तमालप्रवालालंकृताः काश्चित्सिंहलीला इव नागकेसरसंयोगशालिन्यः काश्चिद्दरि
वेशकथा इव हारमौक्तिकैस्तारकामयं शुक्रं दर्शयंत्यः इतरा महाभारतवार्ता इवानुभूयमानवनपर्वाणः अ
परा रामायणकथा इव सुंदरोरुकांडमंडिताः अन्या मीमांसकगोष्ठ्य इवानल्पयासिद्धाभ्यासविहितकर्मभेदाः
काश्चिदुपनिषद इवाद्वितीयरूपाः काश्चिद्देशिकांतेवासिन्य इव समन्कीकृतशाह्वार्थाः कनककावकाः प्रादुरभवन्
तासु मनरमुभयतः परस्पराभिमुख्येन समुदायतामापद्य कांचनलतामयमिव भागद्वयमादधाना मध्यतो रथ्या
मिव विरचयंत्यो विलोचनविलासैः कुवलयावलीमयमिव मणिमंडलैराकाशमथाकरमयमिव भूषणमणिकि
रणपरंपराभिस्तेजोमयमिव कलेवरकांतिभिश्चंपकमयमिव चरणैररुणराजीवमयमिव जीवलोकमुपदर्शयं
त्यः स्थानं तस्थुः ॥ अथ तदाभरणमणिमरीचिवीचिभिः परस्परमनुबध्यमानाभिरुत्पतामुपेयुषि मध्यभागे व
काशे समदनकुतूहलप्रहितचक्षुषि मिवभ्रमावः सहसैव नभसि द्युवेव निर्गच्छंती जातवेदसो जठरादिय पांचाली रा
गसागरोदरादिव सौंदर्यलक्ष्मीचंद्रांतरादिव कौमुदी सैंधवेलाजलधरादिव विद्युल्लता चंडांशुमंडलादिव तप
ती सूर्यकांतमणिमध्यादिव ज्वलनशिखा दुग्धोदन्वत इव चंद्रलेखा मेरुमणितटादिव भासन्मूर्तिम् द
र्पणादिव सुवर्णप्रतिमा स्वकीयाभिः प्रभाभिः सहचरीनिवहविभूषणमणिकिरणजालमभिभवंती सकल

त·कु·
८९
86

दिग्धापि नीलावर्णप्रवाहेन नूपुररवोपहूतकलहंससमारोहणेनेव संततरंतीं दीप्यमानप्रभूततमप्रसाधनमणि
किरणांतरतया जंगमामनंगदीपलतामिवोपलक्ष्यमाणाम् सहचरीनिवहहृद्गतसंतानकंचुकितेन महेंद्रनीलो
पलाकलिततोरणेनेव कुवलयदलमालिकाशालिनेव कलिंदनंदिनीकल्लोलावलिशबलितेनेव मार्गेणासमा
यांतीं सज्जातरूपोद्वहेन तो यौवनानलस्येव धूमवीरुधा जगद्विजयिनो विषमबाणवीरस्य चामरमालया जन
मोहनकारिणो लावण्येंद्रजालिकस्य मयूरपिच्छिकया रसातलगताहतेर्वर्षारंभस्य बलाहकलेखया ज्वलनप्रणयशा
लिनः शृंगारमहारसस्य कलापकलिकया हृदयसंतापहारिणो बाल्यदिवसावसानस्य तमिस्रलेखया यमुनये
व बलाकर्षणयोग्यया उज्ज्वलरसवारिम्येवोर्मिमत्या मन्मथसिंहासनजनावस्येव जराहृष्टीकरणाञ्जनपयामार्
रच्छुद्दच्छत्रिकयेव मानसदालोकनिवारणसमर्थया कुसुमधूर्तेव मदनोत्पत्तिहेतुभूतया धूमलतयेव नयनवि
कारकारिण्या कादंबिन्येव शिखंडोल्लासकृता सुवजनजीवभूतयेव प्राणबंधया भ्रमरपंक्तिपरंपरयेव कुसुमास्त्रबं
धबंधुरया शिखिविवहपंक्तेव कबरीभूतया चैत्ररथतमालवीथ्येव प्रसाधितालकया कामकपालिकयेव
लग्नसिंहलोहितायया केशकलापमंजर्या समुद्भासमानाम् कुंतलकलापकिरणोत्करप्रकारेण महें
द्रनीलमणिनेव मृगमदबिंदुतिलकेनालंकृतभालभागाम् शंबरासुरनिकृतमन्मथधनुःशकलयुगलेने ८९

वकामविकारांधकारप्ररोहसमुदायेनेव यौवनोपनिषदारंभप्रणवदलद्वयेनेव सौंदर्यप्रशस्तिलिखिताक्षर
पंक्तिद्वयेनेव भ्रूलताद्वितयेन विराजमानाम् कनीनिकेंद्रनीलरत्नप्रभाप्रवाहद्वयाकाराभ्यां नेत्रनीलनलिन
नालीरचरीभ्यामिव मधुकरमालिकाभ्यां नवजलदशकलराजिभ्यामिव तारकातिरोधानकर्मकुशलाभ्यां
पक्ष्मलोमपंक्तिभ्यां विभूषिताम् मीनकेतनसायकनीलनलिनाभ्यां वदनारविंदमधुकराभ्यां स्मरविजयपता
कामीनाभ्यां हरिणरुचिरत्वादेव तारोल्लासनशीलाभ्यां कुसुमत्वादेव कर्णाभिमुखाभ्यां कुवलापीडपराभवयो
ग्याभ्यां च कामपालत्वादेव कालिंदीकल्लोलाकर्षणकलाकुशलाभ्यां उत्पलभ्रमागतभ्रमरसंबंधादेवाभिमु
नमृगमदाभ्यां यौवनगंधसिंधुरमदप्रवाहाभ्यां च मदनप्रियत्वादेव रतिकर्णावतंसकुवलयाकाराभ्यां
चकोरलोचनापचारादेव मन्मथविकारप्रदोषारंभतिमिरोद्गमप्रायाभ्यां अंजनाश्रयत्वादेव शर्णानंदस्वरूपा
भ्यां तपः परिणमस्वपामात्वयादेव शर्णानंदस्वरूपाभ्यां महामायाभ्यां वृजिनमायाभ्यामपि प्रमोदातिशयज
नकाभ्यां दृष्टुभ्यामप्यनुपहितादार्यतरलभावाभ्यां रूपग्राहकाभ्यामपि श्रवणाभिमुखाभ्यां कालात्मकाभ्या
मपि विशेषग्रहणवर्ज्याम् असितरूपाभ्यामपि कृतश्रुतिलंघनोद्यमाभ्याम् विशेषदर्शनवर्ज्यामप्यविमुक्तवि
भ्रमाभ्याम् अतिप्रसन्नाभ्यामपि मदनविकारघूर्णिताभ्यां विश्रुतकरवालाकृतिभ्यामपि शृंगविरहिताभ्याम्

तेजसाभ्यामपमृक्तमरसीभावाभ्यां विलोचनाभ्याममभिरामाम् विलोचममीनविलोभनशैवालांकुरेण मदनरथध्वजलं
वितशिखिपिञ्छावचूलेन कपोलचंद्रबिंबकलंकेन पद्मरागाभरणप्रभासंध्यातिमिरोदयेन तमालपल्लवेन कृतोत्तंसा
भ्याम् सर्वविद्यारहस्यमथारम्भ विंदुपाथैः कुंतलकलापकादंबिनीमनञ्जीर्णकरकायमाणैः स्वरभिसमयावमार
कुंदकलिकाकारैः रमानुगुणाशारदारंभनक्षत्रकल्पैः रतिस्फूर्तेर्मुक्ताफलैः प्रसाधिताभ्यां समिध्यमानमदनवीति
होत्रविस्फुलिंगकणिकाभिरिव कुसुमसमयोदिताभिरशोककलिकाभिरिव माणिक्यमहाविभिरनुप्रोतेन शशि
तेनथामिहत्यमयोनिजन्मना कर्णाग्रवर्तिरंध्रप्रविष्टेन सौदामिनीदाम्नेव श्रवणाभरणद्वयेन परिष्कृताभ्यां कर्णा
भ्यामपशोभमानाम् लावण्यलक्ष्मीदर्पणाभ्यामिव प्रतिफलितसर्वतद्गुणाभ्यां केतकीकपोलयोरणाग्रयोपथा
नाभ्यामिव मदनकस्तूरीरजीकृततयोज्वलाभ्याम् मधूककलिकाभ्यामिव प्रचलदलकमधुकराकुलिताभ्याम्
चंद्रबिंबाभ्यामिव प्रकृष्टोमनयनविषयीभावयोग्याभ्याम् मदनोपगृहीताभ्यामिव गांभीर्यविहीनाभ्याम् अशो
ककिसलयावतंसेनेव कुंकुमद्रवपंकेनेव बाल्ययौवनसंधिवेलरागेणेव श्रवणकुरुविंदकिरणश्रेणीजालकेन
परिष्कृताभ्यां कपोलाभ्यां कमनीयां सौभाग्यसंपन्निबंधनपर्यवसानपुष्पकेसेव भालाभरणलग्नसधूम्रमंतरा
ललंबिनोऽतितनीयसोऽतिमिरलेखयोः सीमंतमंतरासंतन्वतोऽरुणरागस्येव लोहितकस्य विहितवंशाधिरोह

न·कं
८१
87

णायालावण्यलक्ष्मीलासिकायाः करग्रहणयोग्यतामांजिष्ठस्रक्परंपरयेव कौसुंभवसनवैजयंतमिव पीदीधितिधारया
प्रसाधितेन मीनकेतनपताकावेशेनेव वलयितविद्रुमगुणावनद्धाभ्यामिव करकाभ्यां स्वतेजोभिभवोद्गावितविरो
धनयामथ्यनिरुद्धभासस्याभिव देवदैत्यग्रहाभ्यां कुशेशयकेसरकल्पिताभ्यामिवांतर्निहिताशोककोरका
भ्यां कुंदकलिकाभ्यां लोहितांगोभयभागवर्तिभ्यामिव नक्षत्राभ्यां हेमवालिकाग्रथिताभ्यां गर्भितपद्मरागाभ्यां
मतिस्थूलाभ्यां मुक्ताफलाभ्यामुल्लसद्ग्रैणातिलकसमेनेव पयोधराविर्भावकलीनोन्नतिम्नता लावण्यरसस्रो
तसाप्यनिम्नगतिभाजा अनभिहितस्वरूपेणाप्यानंगधेन सकलमुखसदृशेनाप्याकलितसच्छिद्रांतरालेनाप्र
भाकरेणापि दिष्टिपुटीभत्यन्तवादिनानासिकादंडेन प्रकाशमानाम् रसनासिंहासनारूढवाग्देवताकरस्फटिका
क्षमालामिव जिह्वावीरुदुद्भूतकलिकावलीमिव रतिरमणवीरमारसनमौक्तिकमालिकामिव सर्वविद्यारह
स्यसूत्राविंदुवीथिमिव उज्ज्वलतरामप्यरोका शांतसंजनयित्रीमपि निशांतशोभां सुमनःशरदालिकामप्यमु
कुलनभावोदयशतपालिंदथानां यौवनगंधसिंधुरप्रसाधनचूर्णेनमदनमहोत्सवोपयोगिपटवासपरागेण सौ
दर्योदन्वदंतरविद्रुमदलेन रतिविलासिनीसीमंतमाणिक्यमणिना स्मितकौमुदीसमुदयरागेण द्रपदीर्घिका
कोकनदकोरकांकुरेण कलेवरकांतिवल्लीपल्लवेन शृंगारोपवनजवाप्रसूनेन वाग्देवताकरकमलपंजरांत

त॰कु॰ गनकीरविलोभमावरूपविंवफलेन लोहितांगेनाप्यधरोदितरूपेण अरुणेनाप्यनुल्मकरेण शोणेनापिकृतसि
८८ तामिभूतिनामधुरस्वरूपेणापिपीयूषास्वादशालिना सद्यालारसेनापितिरस्कृतद्राक्षारसेन विंबाधरेणारमणीयां
४४ वदनकांतिप्रवाहसंचरणपरिवाहमिवनिम्नमध्यंवेपककोरकमिवलग्नतिलद्विरेफं चिबुकं बिभ्राणाम् उन्नम
स्तनयुगंपिताभिरनवद्याभिर्विमर्दसहाभिर्युक्तिभिरिवसमस्ताभिःपरीतं कुसुमबाणविजयकंबुमिवसारसमपाव
शरतिकरकलितसिंदुवारमुकुलमालिकापरिक्षेपं अजातशत्रोरिवस्थितानंतविजयभावं नकुलस्येवसहदेवोपस
हदेवस्येवसन्मणिपुष्पकं पुराणपुरुषपाणिपरिवर्तिनमिवपंचजनविजयलभ्यं चतुर्विधपदजातनिवासमस्मि
विभाजिकाभिरिवत्रिभिर्लेखाभिरलंकृतंकंठंवहंतीम् अरुणप्रभयेवतिमिरभारलग्नया पद्मरागप्रभयेवम
हानीलानुसक्तया अलंकरणकांचनकषणलेखयेवयस्मिन्निकषावसक्तया कंठाभरणबंधलोहितपट्टसू
त्रीकृतयालंबमानयाविभूषितावृत्तदाम् अरुणकिरणशोभाभ्यामिवमदनादित्योदयपर्वताभ्यां कमलके
सरपरागरंजिताभ्यामिवकांतिसरसीचक्रवाकतरुणाभ्यां सिंहरराजस्यंदनाभ्यामिवकामदेवसपर्याकांचनक
लशाभ्यां कुंकुमोपदिग्धाभ्यामिवमन्मथवल्लभकुंभाभ्यामिवसंजातदिव्यकुसुमस्तबकसंयोगाभ्यांलावण्यवेला
तालीफलाभ्यामिवमधुररससंभृताभ्यां भाविवल्लभकरजव्रणांकिताभिरांजिकाभिर्मणिमालाभिरुपशोभि ८८

नाभ्यां पर्वतत्वादेव संदर्शिताश्रमगर्भाभ्यां चक्रवाकत्वादेव तीरेतरविश्लेषमसहमानाभ्यां कुंभत्वादेवप
राधरीकृतनिस्तंभकनंदजाभ्यां तालत्वादेवोन्मादसंपादकाभ्यां मकुलत्वादेव कृतगुच्छपरिचयाभ्यां कलसा
ग्रजन्मत्वादेव प्रलंबभावमसहमानाभ्यां श्रमनतत्वादेव डुर्लभमुखाभ्यां सुहृन्नत्वादेव प्रकाशप्रवृत्ताभ्यां
हृदयभवत्वादेव निबद्धमनोभवसौहृदाभ्यां पयोधरत्वादेव समुन्मिषन्माणिक्यमरीचिमंजरीसौदामिनीदाम
भ्यां कुशेशयकोरकत्वादेव मिलितमहेन्द्रनीलमिलिंदमालाभ्यां स्तनाभ्यामुपशोभमानां केशरपद्मरागमयू
खैः पल्लविताभ्यां करजांकुरैः कुसुमिताभ्यां कवरीबलाहकलेखामुक्ताभिर्जलबिंदुधाराभिरिव पत्रपाश्या
गुंफितमौक्तिकवल्लरीभिः कृतमूलसेकाभ्यामिव लताभ्यां प्रकोष्ठवलयग्रथितमरकतमणिमयूखमयसंव
र्तिकासंहताभ्यां प्रथमाग्रपल्लवकांतिमथकरांजितमनोज्ञकरकमलाभ्यां लावण्यपरमसरसीनिरूढाभ्या
मिव मृणालीभ्यां चंपकमालाभ्यामिव रतिकेलिकंठग्रहयोग्याभ्यां मदनपाशलताभ्यामिव हृदयबंधनति
बंधनाभ्यां पीनतराभ्यामपिष्ठनपारिमंडलाभ्यां अंगदसंगताभ्यामपिष्ठुतरामानीकभेदशालिनीभ्यां सक
टकालिकाभ्यामपि कोमलाभ्यां भुजाभ्यां विभ्राजमानाम् भुजविजिताभिर्मृणालिकाभिरिव सेवार्थमाग
ताभिर्वदनद्युतिहृतराकेंदितेनेंदुना प्रहिताभिः सकलाभिरिव करसंबंधशालिनीभिर्हीरदंतमयीभिर्व

लयावलीभिराकलितशोभां ताम्रपरक्ताशोककिसलयाभ्यां करजरुचिजालसरोवारिरुहाभ्यां मीनकेत
ननृपतिनिवासभूमितयाश्रितमीनशातपत्राभ्यां दिव्यमिवसुपर्वभिरंगुलिभिर्विहितसंगां हारायशंपितगा
रुन्मत्तमणिशलाकामिव नाभिसरोविहारिमधुकरपरंपरामिव रोमावलिं वहंतीम् त्रिवलितरततरतरंगैरो
मावलीशैवललताविलसितां रतिमन्मथयोः शृंगारसरसीमिव नाभिं दधानाम् हारमुक्ताफलनवयलदक्षमा
णां स्तनरोमावलीव्याजस्फलेवं ग्रवलग्नगगनं विश्राणाम् लावण्यवल्लेरालवालेन शोणमणिमयीभिर्मकर
ध्वजविजयनीराजनदीपावलीभिरुल्लसता मध्यशून्यवादिनेव कृतमहालोकायतसूत्रबंधेन मन्मथमन्त्रमा
तंगबंधनशृंखलाकलापेन मेखलादाम्ना कृतपरिक्षेपां रूपविशेषविश्राममणिवेदिकातलेन कुसुमबाणश
यनीयेनेव स्मररतिविमर्दसहेन नितंबबिंबेन विलसंतीम् करभपरिभावकाभ्यां रंभास्तंभदंभसंभावनाः सहना
भ्यां करीन्द्रकराहंकारविकारागदंकाराभ्यामूरुभ्यां स्फुरंतीम् मंजीरमणिमयूखमालामयचामरदाममंडने
नस्मरविजयस्तंभेनेव जंघाकांडेन विराजमानां प्रशोककुसुमसर्वांगस्यात्मरूपैरिव यावकद्रवैरंजिताभ्यां
नखमयूखमृणालदंडलोभादागताभ्यामिव हंसकाभ्यां विभूषिताभ्याम् रामणीयकशिथिलीकृतैः कि
सलयाहंकारग्रंथिभिरिव नीचनमापन्नैर्गुल्फैरन्विताभ्यां कांतिविशेषनिर्जिताभिरिंदुकलाभिरिवासन्न ८९

वाभिरंगुलिभिरलंकृताभ्यां अशोकनोकहदोहदप्रहरणावसरलग्नाभिस्तकलिकाभिरिवाभरणीकृतमणिपं 4.
क्तिभिरुद्भासिताभ्यां चरणाभ्यां रमणीयां श्रीगौरीहृद्यामिव गृहीतकेशवेशां मन्मथमायामिव दर्शितालीकशो
भां नक्षत्रमालामिव चित्रालंकृतहस्तश्रवणां दमयंतीमिव स्वमनोमार्गणावीरसेननवानुरागां गांधारीमिव भी
मविपक्षांगजातां अहल्यामिव प्रहृतशतानंदां तारामिव लालितांगदां पांचालीमिवानेकवालभ्यां मंदोदरीमि
व जनितेंद्रजिदंगजां मैथिलीमिवाभिरामां चंद्रकलामिव लब्धनीललोहितशेखररत्नभावां रोहिणीमिवेंदुस्यंद
रमालीम् अरुंधतीमिवांगजशक्तिसंवर्द्धनपरां लोपामुद्रामिव लब्धस्तनकुंभसंभवां रुक्मिणीमिव मन्मथजन
नयित्रीं रतिमिव पुष्पचापव्यतिरेकहीनां पौलोमीमिव शतमखोपभोग्यां कुंतीमिव निरूढकर्णांतिकगतागत
यग्रदष्टिं सद्बुद्धिमिवायतदर्शनाम् प्रभावतीमिव वशीकृतमीनकेतनां राधामिव कुवलयापीडविपक्षनयन
व्यापारभूमिं सत्यभामामिव परिमृतपारिजातां वेलामिव विद्रुममालाधरां वरुणदिशामिव सां वसंतलक्ष्मीमि
व कोकिलकलालापवतीं ग्रीष्मसमयलक्ष्मीमिव पाटलामोदसुरभिश्वासममारुतां प्रावृषमिव समग्रडभारसह
जघनां शरदमिव सिताभ्रच्छेदच्छुरितां शिशिरसमयाश्रियनदीर्घतमेक्षणां महाश्वेतामिव नयनैकविषयी
कृतपुंडरीकां कादंबरीमिव कपोलतलप्रणयीकृतपत्रलेखां कुमारबालकेलिमिव सर्वमंगलावेक्ष्यमाणां

न·कु·
५०
९०

मदनयागमंडपभूमिमिवकुंडलाभोज्ज्वलाम् रतिरमणसिंधुरविहारसरसीमिवकरनिरस्तकुशेशयाम् यागभू
मिमिवप्रशस्तहस्तां नंदनभुवमिवहरिचंदनाधिवासितां रंभामिवस्तनमणिग्रीवाग्रजातरागाम् उर्वशीमिव
लब्धसौम्यसंभवभावां मेनकामिवकौशिकेनापिकमनीयाम् संध्यामिवस्थिरच्छायाम् छायामिवरमणीयचक्रोडां
सुभद्रामिवजितहरिरणपुरुषपरिगृहीतां यमुनामिवरेवतीरमणोत्सारितसलिलाम् रुचिमिवविपुलगुरुरूपभोगार्हव
क्षोरुहां वाग्देवतामिवहंसगामिनीं देवयानीमिवकचोद्वहेतां शर्मिष्ठामिवाभ्युपगतकचगुर्वीममहत्प्रभावां
गुणकेशीमिवसमभर्तृजीवनदैर्घ्यहेतुं अदितिमिवोल्लासितनिर्जरां वरांगीमिवस्फुरन्मारकां त्रयीमिवसस्वरगणां
न्यायोक्तिमिवविशिष्टविभ्रमां वैशेषिकस्थितिमिवतिरस्कृतोपमानशब्दाम् मीमांसामिवगणसंख्याश्रितभे
दां वेदांतमर्यादामिवाखर्वदृष्टिसृष्टिविदग्धाम् सांख्यस्थितिमिवगुणात्मकप्रकृतिं पातंजलवाणीमिवपुरुषानु
ग्राहकतत्परांशब्दविद्यामिवदृश्यमानरक्ताधिकारां सौगतवाचमिवोपचितस्कंधां ज्योतिर्गणितपरिभाषामिववि
विक्तवाङ्कार्णाम् स्मृतिमिवस्थितसंस्काराम् पारिजातमंजरीमिवसुरयुवतीनामवतंसनीयाम् श्यामामप्युत्तमलो
श्रवरसंयुक्तामपिसंहृतां रागमयीमपिमुक्ताश्रितां सुगतानुगतामपिसमयापन्नां हरसितांवामपिनाहार्यशोभाम्
भास्वत्करामपिनखरमयूखमंडितां मायानुसारिणीमपिसमावयवां चंद्रमुखीमपिचक्रांगकामगतिं उन्नतपयो

५०

धरामपि विलसन्नयनवेजनां श्वेतहारामपि नष्टनगुणां अदोषाम्लिकामपि दृष्टपतारकां समासादितश्रविभा
वामपि प्रेतलाणीघनमालपत्राम् मंदोदरीमपि नकविभीषणाभावां छायोद्भवमसिमपि अलक्ष्मंदतां नर्मदा
मपि न विजयमोचश्रुतां प्रथान्मभ्रजं सत्कटकामपथाराभिरामां मृगाक्षीमपि पुंडरीकेक्षणां सपार्श्वस्थिति
मपि गिरीं हृदेवर्तमानां जगत्प्राणभृतामपि सकलानिशाधिरूपां चतुरस्रशोभामिनीमपि रमाधिकां श्रवदरा
मपि तिलोत्तमासोदरां कदलीकांडपीवरोरुमपि रंभां संभमदंभमसहमाना श्रवदरामपि तिलोत्तमासोदराम्
कदलीकांडपीवरोरुमपि रंभां स्तंभमसंभावयंती दग्धमन्मथांकोद्देशभूमिमिव मदनसर्वस्वस्य आश्रितकचांसंजी
वनविद्यामिव हरकोपानलभस्मनो विषमबाणस्य पूतनप्रवालां संजीवनौषधिमिव यौवनस्य सुस्यापितकचक
लशामर्चनवेदिमिव कामस्य अनेकभेदाकरप्रोल्लासशालामिव विलासानां निगूढभावां विद्युतमिव रसस्य
श्रस्य कृतपत्रविन्यासां राजधानीमिव मदनमहाराजस्य विजितसरस्वतीकामध्ययनभूमिमिव संगीतानां
बद्धमौक्तिकजालकां वृत्तानिगूढकौतुकालोकनचंद्रशालामिव रतिदेव्याः कृतरसासेकामपवापस्य
लीमिव स्मरकेलिबीजानां उल्लसत्कलानिधिशरदमिव चातुर्यचकोरस्य रमणीयसंनिवेशां सभामिव सौ
भाग्यस्य उन्मूलितहृदयां विनयभवमिव गुणानां कलधौतमयकटकामुदयाचलतटीमिव सौंदर्यचंद्रम

त·कं·
९१
७१

सः गतोस्मभावंलणदामिव दक्षिणतांचंद्रिकायाः सदाकलहलतांनंदनमेदिनीमिवौदार्यमंदारस्य अनुभवैकगम्यां
भावनामिव दिव्यनारीस्मरणानाम् कुलिशालेकृतकरांबलवैरिकलेवरलतामिवानुलोमताप्रतिलोमततयायाः अलत्र
तांवामयष्टिमिवकलाकलापिनीनाम् सर्वतापापहारिणींसुधादीर्घिकामिवमाधुर्यस्य नवकिसलयसुकुमारांरसा
लवल्लिमिवकोकिलालापानाम् रमणीयप्रसवांवीरुधमिवविभ्रमभ्रमराणां सुकुमारलालनीयांमंविकोत्संगभूमि
मिवविनयविनायकस्य प्रतिपादिततरुणीमोपभोगांमथिकारापहारशासनपटीमिवशैशवस्य अनुबंधिनींलोभा
यतिमिवशोभायाः रतिनादिकाप्रस्तावनोपकुंकांकुसमांजलिघटनामिवकांतिर्नर्तक्याः अतिनवयौवनांकरिकपोल
पालीमिवमदलेखानाम् लंबमानस्रग्दामांकुसुमदोलामिवदीप्तिविलासिन्याः वहत्स्वमानगुणांगेफनथरामिवहृ
क्रिस्त्वकंसंदर्भाणाम् कुवलयमालाकोमलांकालिंदीमिवकटाक्षकल्लोलकेलीनां यथावदुपपन्नांगोपांजगद्विजयविद्या
सिद्धिमिवप्रसूनबाणस्य दृश्यपारिजातपल्लवाश्वर्ववेलामिवरतिसुखोदयस्य प्राप्तप्रजापतिसर्गातिशयांमायुषीष्टि
मिवशृंगारस्य अपगततमतमस्कारांकारजनीमिवस्मितचंद्रिकाणाम् अद्भुतपारदांरसायननिःपत्तिमिवलावण्य
स्य स्मरगेषांसहस्रपरात्रिमिवशीलशीतलतायाःसहजरमणीयामविच्छेदविद्यामिवविच्छित्तेःसुधावदातांचंद्रशाला
मिवमंदाक्षस्य उन्मकाहारांतपस्विनामिवमनस्वितायाःअभंगुरस्नेहांदीपिकामिवप्रभाविशेषाणां मखरामायण ९१

सौरभलोभानुबंधिमधुकरनिकरां विजयघोषणामिव रमणीयतायाः कांचनमयीं संचारिणीं पांचालिकामिव ली
लायाः मंदारमंजरीं ददर्श ॥ सा तु समागमाभिमुखप्रेषितचक्षुषं विभ्रमात्प्रेमभावानुरागवशीकृता प्रणयपारिप्लवा
भिरपांगभंगिभिः पश्यंती स्मरफलच्छेदलोदैरिव समाच्छादयंती कुमुददलदामभिरिव तिरोदधाना केतकीकिस
लयैरिवाकल्पयंती कर्पूरपरागैरिव धूसरयंती पयःप्रवाहैरिव स्नपयंती सुधाधाराभिरिव तिरोदधाना मदयंतीव नाया
श्रेतिकल्पमसमर्प ॥ तदानीं च तस्याः श्रमविस्मयोगमनतन्निरीक्षणाभ्यां संभाव्यमानो रतिकार्याणां स्वसाधारणीक
रणेन तत्त्वाणां बंधुतां ववंधतः तथाहि तदवलोकनाडुहेलतामपेयुषो महाद्भुतपीयूषसागरस्पृष्टघतात्रवकुंदमकु
लमेदुराः स्वेदबिंदवः समस्पंदनं संचरणश्रमेण शिथिलीभवदुत्तरीयकुक्कुलांचलं वक्षःस्थिय घावन्निवेशायंस्या स्माश्लि
नेव शुणप्रपंचप्राप्तप्रेयसनपायीप्रणयपरिणाहोत्तु रूपरतीवांतः करणंकंकणक्वणितकैतवाकरः कथयांचका
र विस्मयविधूयमानवदनारविंदायाः स्मरमकरंदबिंदव इव बाष्पपृषता निपेतुः तन्मात्रविषयकत्वेन हृदये स्थितिमा
व भवतो मकरध्वजस्य प्रभवः सरागमलयमारुतानुरवगंधसारः स्मरभयो निःश्वासपवनाय वनाबभूवुः तद्दृष्टिकादंबिनीकृ
ताभिषेकं केतकीकुसुममिव कलेवरं कंटकितमासीत् तद्गात्राणां परंपरासंयोगं तस्यां विधित्समानाः इव मन्मथबाण
मणिकिरणश्रेणयः संचारिण्यः प्रस्तावमसक्तः तीव्रान्तमंडलकजानं तदीयमिव दंताग्रस्वकीयमंशुकमदशत्

न·कु·
९२
92

कंपमानकलेवरायाश्च किंकिणीगणाक्वणारुणप्रणादो मदनाद्वैतोपनिषदध्ययनध्वनिमिव निदधार्यत कुशेशये
क्षणाकलनकलुषिताभिमुखोपनतभ्रमरवारणायसंभ्रमोत्क्षिप्तकरायाश्च कंदर्पकार्मुकटंकार इव वलयकलकलछले
न प्रकटतामिव कलयांचकार॥ तदानीमेव च वधूजनप्रथमगणनीयां शिखंडिमूर्तिमिव पुरस्कृत्य मंदारमंजरीमसं
जायमानदर्शनेन मदनधनंजयेन प्रेरितानामखिलावयवमज्जनभाजामजिह्मगानामीषत्विशेषजुषः पुंखोद्भवा
स्वदेहांतरस्य भीष्मस्येव कुमारस्य चिरमानोरोमांचसंचयाः समुदंचंति स्म जननयनेषु समरमखेषु च दर्शितचंद्रकांत
ग्रावतादात्म्येन तदंगं मंदारमंजरीवदनकुमुदबांधवकौमुदीपरामृष्यमाणमार्द्रतामगमत् गुणगणमौक्तिकावली
मयस्वदेहस्तत्र लभावं विभरांबभूव कविकुलसंप्रदायं स्मात्तात्क्रियमाणतया संवादेन प्रमाणयदिव विस्मयावह
वेदनविंविंविधूयमानं कीलांबभूवे तपोवनावलोकनसमाकलितस्य शांतरसस्य मंदारमंजरीसमुदीक्षणाद्वंदं च
ताशृंगाररसे मृदितोधिव्यातिरस्यमानस्य विंदव इव बाष्पप्रसराः प्रासस्त्रुवत् तन्निभालनरससमास्वादनेन चरि
मार्थतामेव तु निर्वापितस्यापि स्मरस्य संचिते संचितशल्यश्ववलगिंद्रियेन मदवयवाः स्वभूषणमणिप्रतिबिंबकैतवे
न ममस्यंतर्मिव प्रवेशयांबभूवुः अपि च परस्परसंबंधिनि कपोलफलके प्रतिफलकैतवेन दर्पणोदरविशद
तया प्रविशंतौ तन्मोपरामविरहेष्वयाकंटकमयैः शंकुभिः कीलिताविव विभावयांबभूवतुः ते प्रामरस्मारत्वांतरम् ९२

त॰कु॰
५२
93

तिविंविनौचतन्मयूखेयगणावागुरानिवद्धाविवादर्शिवानाम् रसोद्रेकप्रादुर्भवद्वाष्पश्चयजालजटिलपरस्परलोचन
संयोगादिवावयवजातमार्द्रीभवद्भिर्बभूवतुः ॥ एतावदेवरचितं श्रीविश्वेश्वरसूरिभिः ॥

५२